# संस्कृतवार्ता:

दिनाङ्क :- 28.05.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा प्रधानमन्त्री नरेन्द्रमोदी श्व: चतुर्णां राज्यानां यात्रायां सप्तति सहस्र कोटितोऽपि अधिकानां कासांचित् परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति।
- केन्द्र-प्रशासनेन चतुर्दश शारदीय शस्यानां न्यूनतम-समर्थन मूल्यं-एमएसपी वर्धापितम्।
- प्रधानमन्त्री स्वतन्त्रता-सेनान्या: विनायक दामोदर सावरकरस्य जयन्त्यां तस्मै श्रद्धांजलि: अर्पितवान्।
- विदेश सचिव: विक्रम मिसरी अद्य अमरीकाया: अवर सचिवेन जेफ्री केस्लरेण सह अमिलत्।
- ऋतु-विभागेन प्रोक्तम् अस्य वर्षस्य प्रावृड्-काले सामान्यात् अधिका वर्षा सम्भाव्यते।
- हॉकी स्पर्धायाम्, भारतीय कनिष्ठ-महिला-दलं तत्रत्यं अर्जेंटीनादेशं द्वि-शून्य अंक पुरस्तात् पराजितवत।

---

<u>प्रधानमन्त्री-यात्रा-प्रदेश</u>

प्रधानमन्त्री नरेन्द्रमोदी श्व: चतुर्णां राज्यानां यात्रायां सप्तति सहस्र कोटितोऽपि अधिकानां कासांचित् परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति।

प्रधानमन्त्री नरेन्द्र मोदी श्व: सिक्किम-पश्चिमबंगाल-बिहार-उत्तर प्रदेश-प्रदेशानां यात्रायां भविता। द्विदिवसीयस्यां यात्रायां असौ अनेकासां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति। यस्या: सर्वं समेत्य सप्ततिसहस्रकोटित: अधिक: व्यय: अस्ति।

सिक्किम-यात्राया: समये प्रधानमन्त्री सिक्किमस्य स्थापनाया: पञ्चाशत् वर्षाणि यत्र प्रगति: उद्देशेन मिलति प्रकृतिश्च विकासं पोषयति इत्यस्मिन् कार्यक्रमे भागं ग्रहीष्यति। स: राज्ये कांसाचित् विकास-परियोजनानां शिलान्यासम् उद्घाटनं च करिष्यति।

---------------------------------------------------

केन्द्र प्रशासनम्

केन्द्र-प्रशासनेन चतुर्दश शारदीय शस्यानां न्यूनतम-समर्थन मूल्यं-एमएसपी वर्धापितम्। वार्तां सूचयन् नवदिल्ल्यां उत्तराह्ने सूचना प्रसारण मन्त्री अश्विनी-वैष्णव: उक्तवान् यत् प्रशासनं शारदीय शस्यनां पञ्चविंशत्युत्तर द्विसहस्रत: षड्विंशत्युत्तरद्विसहस्रस्य न्यूनतमं समर्थन मूल्यं वर्धापितवत् येन उत्पादस्य पारिश्रमिकं निर्धारणं भवेत्।

---------------------------------------------------

पीएम-सावरकर

प्रधानमन्त्रिणा स्वतन्त्रता-सेनानी विनायक दामोदर सावरकरस्य जयन्त्यां तस्मै श्रद्धांजलि: अर्पित:। श्रीमोदी जनसंचारे दृश्यश्रव्यपुटकं दर्शितवान्। असौ उक्तवान् यत् स्वतन्त्रताया: क्रान्त्यां वीर-सावरकरस्य अद्वितीयं साहसं संघर्षगाथां कृतज्ञं राष्ट्रं विस्मर्तुं न शक्नोति।

---------------------------------------------------

विक्रम मिसरी

विदेश सचिव: विक्रम मिसरी अद्य अमरीकाया: अवर सचिवेन जेफ्री केस्लरेण सह अमिलत्। अस्य उद्देश्यं महत्वपूर्ण-प्रविधिषु सहयोगोऽस्ति। उभौ भारत-अमरीकयो: रणनीतिगत-व्यापार-वार्ताया: शीघ्रे-आयोजन-विषये चर्चां कृतवन्तौ। येन प्रविधि-व्यापारयो: क्षेत्रे सहयोग: सुदृढ: भवेत्।

---------------------------------------------------

संयुक्तराष्ट्रशान्तिसेना

गतवर्षे संयुक्तराष्ट्रे सेवमानाभ्याम् भारतीय शान्ति सैनिकाभ्यां मरणोपरांतम् सम्मानम् करिष्यते। ब्रिगेडियर जनरल् अमिताभ झा: आरक्षिभटाय सञ्जयसिंहाय च श्‍व: मरणोपरातं डेग हैमरशॉल्ड पदकेन सम्मानम् करिष्यते। भारतं संयुक्तराष्ट्र शान्ति स्थापना अभियानेषु कर्तव्यवस्त्रधारिणां चतुर्थं बृहत्तमं योगदानं ददाति।

---------------------------------------------------

दल-प्रतिनिधि:

जनता-दल-यूनाइटेड- दलस्य संजय झा: सांसदस्य नेतृत्वे संसदीय-प्रतिनिधिमण्डलम् अद्य इंडोनेशियाया: राजधानीं जकार्तां सम्प्राप्नोत्। अयं भारतस्य ऑपरेशन सिन्दूर अभियानविषये कृतस्य कूटनीतिक प्रयासस्य भागोऽस्ति। कांग्रेसदलस्य सांसदस्य शशि थरूरस्य नेतृत्वे पनामां सम्प्राप्नुवत् भारतीयं शिष्टमण्डलं तत्रत्येन संसदस्य अध्यक्षेण डाना कास्टानेडा अनेन सह उपवेशनम् अकरोत्।

-------------------------------------------------

स्पेस एक्स

एलन मस्क इत्यस्य स्पेस-एक्स इत्यस्य अद्य प्रात: मेगा रॉकेटस्टाराशिप इत्यस्य तृतीयं परीक्षणमपि प्रथमद्वितीयाभ्यां सदृशं असफलं जातम्। उड्डयन काले केषांचित् निमेषाणामनन्तरं प्रक्षेपास्त्रस्य सम्मुखे समस्या समागता। तस्मिन्नेव काले तन्नष्टम्।

-------------------------------------------------

एनटीरामाराव-श्रद्धांजलि:

प्रधानमन्त्रिणा नरेन्द्र मोदिना अद्य एन.टी.रामारावस्य जयंत्यां तस्मै श्रद्धांजलि: प्रदत्त:। जन संचार माध्यमेन मोदी अलिखत् यत् असौ समाज-सेवीआसीत्। स: निर्धनस्य वंचित-वर्गाणां कृते सशक्तं कर्तुं प्रयासेभ्य: व्यापकं प्रशंसाया: पात्रम् आसीत्।

-------------------------------------------------

मॉकड्रिल:

श्व: जम्मू-कश्मीरस्य सीमवर्तिषु जनपदेषु नागरिक-रक्षाया: अभ्यास: भविष्यति। एष: अभ्यास: गुजरात-राजस्थान-पञ्जाब-जम्मू-कश्मीर-प्रदेशेषु भविष्यति। अभ्यासस्य समये अधिकारिण: आपत्कालिकस्थितीनां निवारणाय आवश्यककौशलेन प्रतिभागिभ्य: सुसज्जीकरणाय प्रदर्शनानि प्रशिक्षणसत्राणि च प्रयास्यन्ति। विभिन्नधार्मिक सङ्गठनानां सर्वकारीयविभागानाम्, एनसीसीसी -कैडेट्-जनानाम्, एनएसएस स्वयंसेवकानां च स्वयंसेवका: अभ्यासे भागं गृह्णन्ति।

-------------------------------------------------

## भारतीय ऋतु विभाग:

ऋतु-विभागेन प्रोक्तम् अस्य वर्षस्य प्रावृड्-काले अशेषे देशे सामान्यात् अधिका वर्षा सम्भाव्यते। विभागस्य महानिदेशक: मृत्युंजय-महापात्रा प्रोक्तवान् जूनत: सितम्बरमासं यावत् वर्षा सामान्यत: अधिका संभाव्यते।

-----------------------------------------------

## महाराष्ट्र-वर्षा

वर्षा महाराष्ट्रस्य अनेकभागेषु निरन्तरं प्रभाविता भवति। आईएमडी अनेन चतुर्णां मण्डलानां-रत्नागिरी, सिन्धुदुर्ग, कोल्हापुर साङ्गली-इत्येतेषाम् कृते रक्तवार्णिकी संचेतना प्रसारिता। तटीयमण्डले सिन्धुदुर्गे अद्य प्रात: काले वर्षा वर्धिष्यते। एनडीआरएफ-सङ्घस्य दलं रायगढ़-मण्डलस्य महद्-नगरं गत्वा यत्किमपि आपत्कालं सम्बोधयितुं शक्नोति।

-----------------------------------------------

## जूनियर-महिला हॉकी

हॉकी स्पर्धायाम्, अर्जेंटीनाया: रोसारी क्षेत्रे चतुर्ण्णां देशानां स्पर्धाश्रृङ्ख्लायां तृतीयस्यां स्पर्धायां भारतीय कनिष्ठ-महिला-दलं तत्रत्यं अर्जेंटीनादेशं द्वि-शून्य पुरस्तात् पराजितवत। अर्जेंटीनादेश: प्रथमपादोपान्त्ये मिलग्रोस डेल वैले इत्यस्य गोल अर्थात् लक्ष्यसन्धानेन सुदृढ: प्रारम्भ: जात:। कनिका चतुश्चत्वारिंशत् निमेषेषु समानं कृतवती। शुक्रवासरे आगामिन्यां स्पर्धायां भारतं चिलीं सम्मुखीकरिष्यति।

।। इति वार्ता: ।।